International Journal of Sanskrit Research 2019; 5(3): 62-64

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(3): 62-64
© 2019 IJSR
www.anantaajournal.com
Received: 04-03-2019
Accepted: 06-04-2019

**डॉ. बहुरन सिंह पटेल**
सहा.प्रा. शा संस्कृत महा रायपुर, छत्तीसगढ़, भारत

**Correspondence**
**डॉ. बहुरन सिंह पटेल**
सहा.प्रा. शा संस्कृत महा रायपुर, छत्तीसगढ़, भारत

# अग्निनुराणे योगविज्ञानम्

## डॉ. बहुरन सिंह पटेल

**प्रस्तावना**

पुराणानि भारतीय संस्कृतेः पुरातनं स्वरुपं प्रकाशयन्ति। वेदार्थं च कथाख्यानादिरुपेण विशदयन्ति प्राचीनम् इतिहासम् अज्ञातं चापि एतिह्यं प्रकाशताम् आपादयन्ति एवं भारतीयैतिह्य–ज्ञानाय भारतीय –संस्कृतेः ज्ञानाय प्राचीनाचार–विचार –परिज्ञानाय प्राचीनभौगोलिकविवरण ज्ञानाय विविध शास्त्राणां च सारज्ञानाय पुराणानां महत्त्वं न केनापि निराकर्तुं शक्यते। पुराणम् आख्यानम ़पुराणम् इति । यस्मात्पुरा हि अनति इदं पुराणम् [1]। जगतः प्रागवस्थाम्अनुक्रम्य सर्गप्रतिपादकं वाक्यजातं पुराणम् [3]। पुरार्थेषु आनयतीति पुराणम् [2]। विश्वरचनाया ऐतिह्यमेव पुराण शब्दाभिमतम् 18 पुराणानि 18 उपपुराणानि च पुराण नाम्ना व्यवह्रियन्ते। पुराणं पञ्चलक्षणम्–सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । वंशानुचरितं चैव पुराणं पञ्चलक्षणम्।। वायुपुराणे उक्तम्– यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः। न चेत् पुराणं स विद्यात् नैव स विचक्षणः।। पुराणानां तादृषं महत्त्वम् यथा 'भिन्नरुचिर्हि लोकः'स्वरुचिमनुसृत्य प्रवृत्तोऽपि स्वेष्टं प्रतिगृहृणाति। विदुषे तत्तवज्ञानविषयाःबालिशाय श्रृंगाररसरुचिराणि आख्यानानि नीतिज्ञाय नीतितत्तवानि राज्ञे राजकर्माणि व्यवहारिणे अर्थागमसाधनानि अध्यात्मदृशे बह्मतत्तवमीमांसावनिताभ्यो भक्तिमार्गः जिज्ञासवे भूगोल–ऐतिह्यादिसम्बद्धा विषयाः यथायथं तच्चित्तवर्जकत्वेन प्रवर्तन्ते।

भारतीय दर्शनानि स्थूलपेण द्विधा विभज्यन्ते–आस्तिकदर्शनानि नास्तिकदर्शनानि च। तत्र न्याय–वैशैष्कि–सांख्य–योग–मीमांसा–वेदसन्ताख्यानि षड्दर्शनानि आस्तिकदर्शनानि अभिधीयन्ते। चार्वाक–जैन–बौद्धदर्शनानि च नास्तिकदर्शनानि निर्दिश्यन्ते। भारतीयदर्शनेषु वैशिष्ट्यम्–अध्यात्मभावना–प्राधान्यम् धर्मानुबन्धित्वम् वेदानां प्रामाण्यम् दुःखत्रयविनाशनम् कर्मफलस्यानिवार्यत्वम् पुनर्जन्मनःस्वीकरणम् मानवजीवनान्वयित्वम् चारित्रिकोन्नतेर्महत्त्वम्, अज्ञानस्य बन्धनकारणत्वम,मोक्षस्य जीवनलक्ष्यत्वम् स्वतन्त्रास्तित्वम् कालाविच्छिन्नत्वम, विचारस्वातन्त्र्यमम्, व्यापकम् ईक्षणम् अनुभूतिमूलकम् विवेचन प्राधान्यम ,समाजोत्थापन भावना ,समन्वयभावना संश्लेषणात्मकत्वं च। पद्मपुराणानुरारेण'राजसेषु च मा अग्नेयं च षडेतानि तामसानि निबोध मे [4] राजसेषुचमाहात्म्यमधिकं ब्रह्मणो विदुः। तद्वग्नेश्च माहात्म्यं तामसेषु शिवस्य [5] । अस्मिन पुराणे माहात्म्यसहितं 382 अध्यायाः सन्ति। अत्र श्लोकसंख्या 11457 [6]। अग्निपुराणे प्राप्यते द्वादश सहस्राणि सर्वविद्यावबोधनम् [7]।पुराणस्यास्य कर्ता श्रोता च जनार्दनःइदं सर्ववेदमयं सर्वविद्यामयं सर्वज्ञानमां च । इदं पठतां शृण्वतां नृणं सर्वात्महरिरुपं। विद्यार्थिनां विद्यां,अर्थिनां श्रीधनप्रदम,राज्यार्थिनां राज्यदं,धर्मकामिनां धर्मदं,स्वर्गार्थिनां स्वर्गदं, पुत्रकामिनां पुत्रदं,सर्वसौभाग्यसंप्रदं च, नृणां गुणकीर्तिप्रदं,जयकामिनां जयदं ईप्सूनां सर्वदं,मुक्तिकामिनां मुक्तिदं पापकर्तृणां पापघ्नमस्ति पुराणमिदम्। अत्र मत्स्य– कूर्म–वराह– नृसिह–वामन–परशुराम– राम–कृष्ण– बुद्ध –अर्हत् –कल्किअवतार वर्णनं प्राप्यते। अत्र ज्योतिषशास्त्र ,धर्मशास्त्र, राजनीति छन्द अलंकार व्याकरण कोश शकुनविद्या वास्तुविद्या मृत्यु पुनर्जन्म योगविषयकं च विवरणं प्राप्यते। अत्र सर्वाधिकं विवरणं आयुर्वेदस्य ततः दर्शनस्यास्ति। अग्निपुराणे अष्टांगयोगस्य वर्णनं 372 तः–376पर्यन्तंउपलभ्यते। श्रीमद्भगवद्गीतायां श्रीकृष्णेन प्रतिपादितम् यत्सांख्यैः प्राप्यते स्थानं तद् योगैरपि गम्यते । एकं सांख्यं च योगं च यः पश्यति स पश्यति।। [8] लोके द्विविधा मानवा वर्तन्ते। एके ज्ञानयोगिनोऽपरे कर्मयोगिनश्च। योगाङ्गानि समाधिमधिजिगांसूनां कर्तव्यमीमांसयं बोधयन्ति। योगसाल्याय कायस्य मनस इन्द्रियाणां च शुद्धिरभीष्टा। तदर्थं साधनाष्टकं योगसूत्रे पंतिपाद्यते। यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि [9]। संसारतापमुक्त्यर्थं ब्रह्मप्रकाशकं ज्ञानं,चित्तवृत्तिनिरोधश्च योगस्तत्रैकचित्तता। जीवब्रह्मात्मनोःपरः [10]। योगश्चित्तवृत्तिनिराधश्च [11] (१)यमाः–अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रह यमाः। [12] अहिंसादिपंचकं यम नाम्ना व्यवह्रियते। अहिंसा–तत्राहिंसा सर्वथा सर्वदा सर्वभूतानामनभिद्रोहः। [13] अग्निपुराणे कथितम् भूतापीडा हि अहिंसा, अहिंसा उत्तम धर्मः यथा गजपदेऽन्यानि पदानि पथगामिनाम्।

अहिंसायाः भेददशकं–उद्वेगजननंसंतापकरणं रुक्कृति शोणितकृति पैशुन्यकरणं हितस्यातिनिषेधः मर्मोद्घाटनं सुखापहनुतिः संरोधो वधः। सत्यम्– वाड्.मनसयोः एकरुपता । यद्भूत हितमत्यन्तं वचःसत्यस्य लक्षणम् [14]। सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम्। प्रियञ्च नानृतं ब्रूयादेष धर्मः सनातनः। सत्यं यथार्थे वाड्.मनसे। तथा दृष्टं यथाऽनुमितं तथा श्रुतं तथावाड्.मनश्। परत्र स्वबोध संक्रान्तये वागुक्ता, सा यदि न वंचिता भ्रान्ता वा प्रतिपत्तिर्वन्ध्या वा भवेदिति। एषा सर्वभूतोपकारार्थप्रवृत्ता न भूतोपघाताय। [15] यथादृष्टश्रुतस्य तद्रुपेणाभिव्यक्तिः। अस्तेयम् –चौर्याभावः,परद्रव्यस्य अहरणं वा ।स्तेयमशास्त्रपूर्वकं द्रव्याणां परतः स्वीकरणं, तत्प्रतिषेधः पुनरस्पृहारुपमस्तंयमिति [16]।यदि कोऽपि नरः येनकेनप्रकारेण परद्रव्य बलादपहरति सः अवश्यं तिर्यक्त्वं याति'अवश्यं याति तिर्यक्त्वं जग्ध्वा चैवाहुतं हविः।' (अ पु 273/15) परिग्रहः–भौतिकविषयाणांपरिहारः,विषयाणामर्जनरक्षणयसड्.गहिंसादोष दर्शनादस्वीकरणमपरिग्रहः। अपरिग्रहो भोगसाधनानामनड्.गीकारः। अग्निपुराणकारेणोक्तम्–कौपीनं आच्छादनंवासः कन्थां शीतनिवारिणीम् पादुके गृह्णीयात् अन्यस्य संग्रहणं न कुर्यात्। [17] यमाः हि एते देशकालाद्यनविच्छिन्ना सार्वभौमा महाव्रतम्। ब्रह्मचर्यम्– जितेन्द्रियता,इन्द्रियवशीकरणं च। ब्रह्मचर्यं गुप्तेन्द्रियस्योपस्थस्य संयमः। [18] अग्निपुराणे प्राप्यते मैथुनस परित्यागो ब्रह्मचर्यम्। तत् अष्टधा नारीणां स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं प्राप्तुं संकल्पः अध्यवसायः क्रियानिर्वृत्ति च। क्रियामूलम् हि ब्रह्मचर्यम्। यतोहि वशिष्ठचन्द्रमाशुक्रवृहस्पतिब्रह्मसदृशाः तपोवृद्धा वयोवृद्धास्त्रीभिः विमोहिताः। गौडी पैष्टी माध्वी च त्रिविधाःसुराःकथिताः परं स्त्री चतुर्थी सुरा यया इदं जगत्मोहितम्। जनः सुरां पीत्वा माद्यति परं सः प्रमदां दृष्ट्वा माद्यति। [19]

(२)नियमाः–शौचसंतोषतपस्वाध्यायेश्वरप्रणिधानानि नियमाः [20] तत्र शौचं बाह्याभ्यन्तरशुद्धिः। शौचं सन्तोष्तपःस्वाध्यायेरूवरपूजने [21]। शरीरं धर्मसंयुक्तं रक्षणीयं प्रयत्नतः। शौचं तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा।। मृज्जलाभ्यां स्मृतं बाह्य भावशुद्धिरथाऽऽन्तरम्। उभयेन शुचिर्यस्तु स शुर्चिनेतरःशुचिः। [22] तत्र शौचं मृज्जलादिजनितं मेध्याभ्यवहरणादि च बाह्यम्आभ्यन्तरं चित्तमलानामाक्षलनम् [23]। सन्तोषः– यथाप्राप्तेन सन्तुष्टिः। यथा कथञ्चित्प्रास्या च सन्तोषस्तुष्टिरुच्यते। [24] सन्तोषः सन्निहितसाधनादधिकस्यानुपादित्सा। [25] सन्तोषस्तुष्टि। योगसूत्रम्2;32 तपः–सुखदुःखशोकहर्षादिद्वन्द्वानां सहनम्। मनसश्चेन्द्रियाणां च ऐकाग्र्यं तप उच्यते [26]।तज्जयः सर्वधर्मेभ्यः स धर्मः पर उच्यते। वाचिकं मन्त्रजप्यादि मानसं रागवर्जनम्!।। शारीरं देवपूजादि सर्वदं तु त्रिधा तपः। [27] स्वाध्यायः– अध्यात्मपराणां शास्त्रीयानां च ग्रन्थानानामध्ययनं प्रणवस्य जपो वा । स्वाध्यायो मोक्षशास्त्राणामध्ययनंप्रणवजपो वा। [28] ईश्वरप्रणिधानम्–ईश्वरचिन्तनंईश्वरार्पणं च। ईश्वरप्रणिधानं तस्मिन् परमगुरौ सर्वकर्माणम् [29]। वाड.मयः प्रणवः सर्व तस्मात्प्रणवमभ्यसेत्। अकारश्च तथोकारो मकारश्चार्धमात्रया।। [30] त्रयाणामीप्सितेनैकविधिना हरिमर्चयेत्। प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्चयेत्।। स यों गतिमवाप्नोति न तां कतुशतैरपि। यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। [31]

(३) आसनम्– स्थिरसुखासनम् स्थिरतया दीर्घकालं यावत् सुखेन निषदनमासनम्। पद्मासनसिद्धासनशीर्षासनादीनि योगासनान्यत्र संगृह्यन्ते। योगासनैः कायरोगचिकित्सापि संजायते। आसनं कमला?क्तं तद्बद्ध्वा चिन्तयेत्। शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः। [32]

(४) प्राणायामः– तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः (योगसूत्र2/49) बाह्यस्य वायोराचमनं श्वासः,अन्तर्गतवायोर्निःसारण्रं च प्रश्वासः तयोर्गतिविच्छेदः प्राणायामः। स च चतुर्विध– पूरकः–गृहितश्वासस्य अन्तर्निरोधः। रेचकः– अन्तर्गतप्रश्वासस्‍ बहिर्निरोध। बाह्यकुम्भकः–बहिर्निरुद्धस्य वायो यावच्छक्यं निरोध। आभ्यन्तरकुम्भकः–अन्तर्निरुद्धस्य वायोरन्तरेव यावच्छक्यं निरोधः। प्राणायामेन शरीरमलप्रक्षयः शरीरशुद्धिर्नैरोग्यं च। मनुनोक्तम् दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः। तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात्। [33] प्राणः स्वदेजो वायुस्तस्यायामो निरोधनम् [34]। नासिकापुटमड् गुल्याऽऽपीडयैव च परेण च। औदरं रेचयेद्वायुं रेचनाद्रेचकः स्मृतः। बाह्येन वायुना देहं दृतिवत्पूरयेद्यथा। तथा पूर्णश्च संतिष्ठेत्पूरणात्पूरकःस्मृतः। न मुञ्चति न गृह्णाति वायुमन्तर्बहिः स्थितम्। संपूर्णकुम्भवत्तिष्ठेदचलाः स तु कुम्भकः।। [35] कन्यकः सकृदुद्घातःस वै द्वादशमात्रिकः। मध्यमश्च ,रुिद्घातश्चतुर्विंशति मात्रिकः। उत्तमश्च विरुद्घात् षट्त्रिंशत्तालमात्रिकः। स्वेदकम्पाभिघातानां जननश्चोत्तमोत्तमः।। [36] अजितां नाऽऽरुहेद्भूमिं हिक्काश्वासादयस्तथा। जिते प्राणे स्वल्पदोषविण्मूत्रादि प्रजायते।। आरोग्यं शीघ्रगामित्वमुत्साहः स्वरसौष्ठवम्। बलवर्णप्रसादश्च सर्वदोषक्षयः फलम्।।

(५)प्रत्याहारः–स्वविषयासंप्रयोगे चित्तस्वरुपानुकार इवेन्द्रियाणां प्रत्याहारः। [37] इन्द्रियाणां स्वविषयेभ्यो विवृत्तिः। अन्तर्मुखी वृत्तिश्च प्रत्याहार इत्यभिधीयते। एतस्माद् इन्द्रियाणां वशित्वमुपपद्यते।इन्द्रियाणि प्रसक्तानि प्रविश्य विषयोदधौ । आहृत्य यो निगृह्णाति प्रत्याहारः स उच्यते [38] यमादीनि पञ्च योगाड्.गानि बहिरड्.गसाधनानि मन्यन्ते,धारणाध्यानसमाधयश्चेति त्रयोऽन्तरंगसाधनानि।

(६) धारणा– देवबन्धश्चित्तस्य धारणा। हृत्कमले,नासिकागे,भ्रूमध्ये, अन्यत्र वा कस्मिंश्चित् निर्दिष्टे स्थाने चित्तस्यैकाग्रता धारणेति व्यवह्रियते। धारणया मनसो निग्रहः,एकागतया विषयैक्ये मनसोऽभिरुचिश्च प्रवर्तते। अग्निपुराणे 375 तमे अध्याये धारणाविषयकं मतमुक्तम्– धारणामनसोध्येयेसंस्थितिर्ध्यानवद्द्विधा। मूर्तामूर्तहरिध्यानमनोधारणतो हरिः।

(७) ध्यानम्–तत्र प्रत्ययैकतानता ध्यानम्। तस्मिन्देशे ध्येयालम्बनस्य प्रत्ययस्यैकतानता सदृशः प्रवाहः पंत्ययान्तरेणापरामृष्टो ध्यानम्। एकागीकृते चित्ते ध्येयस्य वस्तुनः एकाकाररुपेण प्रवाहो ध्यानमित्युच्यते। एकस्यैव वस्तुनः ऐकाग्र्येण चेतसा चिन्तनं तल्लीनत्वं च ध्यानमित्यनेन संसूच्यते। ध्यै चिन्तायां स्मृतौ धातुर्विष्णुचिन्ता मुहुर्मुहुः। अनाक्षिप्तेनदमनसा ध्यानमित्यभिधीयते। [39] आत्मनः समनस्कस्य मुक्ताशेषीपथस्य च। ब्रह्म चिन्तासमा शक्तिर्ध्यानं नाम तदुच्यते। ध्येयालम्बनसंस्थ्स्य सदृशप्रत्ययस्य च पंत्ययान्तरनिर्मुक्तः प्रत्ययो ध्यानमुच्यते ध्येयावस्थितचित्तस्य प्रदेशे यत्र कुत्रचित् ध्यानमेतत्समुद्दिष्टं प्रत्ययस्यैकभावना। एवं ध्यानसमायुक्तः स्वदेहं यः परित्यजेत्। कुलं स्वजनमित्राणि समुद्धृत्य हरिर्भवेत्। एवं मुहूर्तमर्घे वा ध्यायेद्यः श्रद्धया हरिम् सोऽपि यां गतिमाप्नोति न तां सर्वैर्महामखैः।। ध्याता ध्यानं तथा ध्येयं यच्च ध्यानप्रयोजनम्। एतच्चतुष्ट्यं ज्ञात्वा योमं युञ्जीत तत्त्ववित्। योगाभ्यासाद्भवेन्मुक्तिरैश्वर्यं चाष्टधा महत। ज्ञानवैराग्यसंपन्नः श्रद्धान्क्षमान्वितः।। [40] योगसूत्रे उक्तम्–ततोऽणिमादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघातश्च। अणिमा परमाणुरुपतापत्तिः महिमा महत्त्वम्। लघिमा तूलपिण्डवल्लघुत्वप्राप्तिः। गरिमा गुरुत्वम्। चरकशास्त्रे प्राप्यते आवेशश्चेतसो ज्ञानमर्थानां छन्दतः क्रिया। दृष्टिः श्रोत्रं स्मृतिः कान्तिरिष्टतश्चाप्यदर्शनम्। इत्यविधमाख्यातं योगिनां बलमैश्वरम । शुद्धसत्वसमाधानात् तत् सर्वमुपजायते। [41]

(८) समाधिः– तदेवार्थमात्रनिर्भासं स्वरुपशून्यमिव समाधिः। सम्यग् आधीयते एकाग्रीक्रियते विक्षेपान् परित्यज्य मनो यत्र स समाधिः यदा ध्यानं ध्येयाकाररुपं स्वरुपशून्यमिव वा भवति तदा समाधिरित्युच्यते। समाध्यवस्थायां ध्यानध्यातृध्येयानामेकरुपता संपद्यते। अग्निपुराणे उपलभ्यते–यदात्ममात्रं निर्भासं स्तिमितोदधिवत्। इत्थं वक्तुं शक्यते अग्निपुराणे योगस्य वर्णनं अस्ति।

**संदर्भ**


1. वायु पुराणम्1/203
2. सयण ऐ ब्रा भूमिका
3. पद्मपुराणम्
4. पद्मपु 263/81
5. मत्स्यपु 53/68

6. आनन्दाश्रममुद्रणालय
7. अ पु 272/11
8. गीता 5/5
9. योग 2/29
10. अ पु 372/1–2
11. योगसूत्रम् 1/1
12. योगसूत्रम् 2/30
13. तदेव व्यासभाष्य
14. अ पु 372/7
15. योगसूत्र 2/30
16. योगसूत्र 2/30 भाष्य
17. अ प्पु 372/15–16
18. योगसूत्र 2/30 व्यासभाष्य
19. अ पु 372/11–13
20. योगसूत्र 2/32
21. अ पु 372/3
22. अ पु 372/17–18
23. यो सु 2/32
24. अ पु372/19
25. यो सू 2/32
26. अ पु 372/19
27. अ पु 372/20–21
28. यो सू 2/32
29. अ पु 372/22
30. अ अ पु 572/35–36
31. अ पु 373/1
32. मनुस्मृति 6/11
33. अ पु 373/6
34. अ पु 473/7–9
35. अ पु 373/10–11
36. योगसूत्र 2/54
37. अ पु 373/20
38. अ पु 374/1
39. अ पु 374/5–8
40. चरकशास्त्र 1/140–41 याज्ञ स्मृ 203